# संस्कृतम्
## अभ्यास कार्यपत्रकम्, 2012-2013

## कक्षा – अष्टमी

समयः – होरात्रयम्  पूर्णाङ्काः – 90

निर्देशाः –

(i)प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) सर्वे प्रश्नाः अनिवार्याः।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि ।

(iv) प्रश्नसंख्या अवश्यं लेखनीया।

(v) उत्तराणि सस्कृतेन एव लेखनीयानि ।

## खण्डः (क )
## अपठित – अवबोधनम्

**1. अधोलिखितं अनुच्छेदं पठित्वा प्रदत्तप्रश्नानां निर्देशानुसारं उत्तराणि लिखत – 5**

हल्दीघाटी युद्धं समाप्तं अभवत्। मेवाडाधिपतिः महाराणाप्रतापः पराजितः जातः। सम्पूर्णरूपेण संकटमापतितम्। मेवाडाधिपतिः महाराणाप्रतापः अरण्ये कतिपयैः विश्वासपात्रैः भटैः सह संकटापन्ने काले विचारमग्नः शिलायाम् उपविष्टः अस्ति। स्वदेशस्य रक्षायै युध्यमानस्य तस्य बहूनि वर्षाणि व्यतीतानि। हन्त! वराकस्य पार्श्वे सेनायाः भोजनसामग्र्याः च अभावः विद्यते। अधुना तु सः स्वकीयैः प्राणेरैव स्वदेशं स्वतंत्रं कर्तुम् इच्छति। किन्तु महादानी भामाशाहस्य सहयोगेन विजयतां स्वदेशः इति भावेन सः पुनः युद्धं कृत्वा स्वदेशं स्वतंत्रं कृतवान्। सत्यमेवोक्तम् – वीरभोग्या वसुन्धरा

(I) एकपदेन उत्तरत– 1/2x2=1

(क) स्वदेशं कः स्वतंत्रं कर्तुम् इच्छति ?

(ख) महाराणाप्रतापः कुत्र उपविष्टः अस्ति ?

(II) पूर्णवाक्येन उत्तरत– 1x2=2

(क) वराकस्य पार्श्वे कयोः अभावः विद्यते ?

(ख) महाराणाप्रतापः कैः सह विचारमग्नः उपविष्टः अस्ति ?

(III) निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत – 1/2x4=2

(क) मेवाडाधिपतिः पदं कस्य विशेषणपदम् ?

(अ) भटस्य (ब) प्रतापस्य (स) वराकस्य (द) वसुन्धरायाः

(ख) हन्त ! पदे का विभक्तिः ?

(अ) द्वितीया (ब) तृतीया (स) प्रथमा (द) सम्बोधन

(ग) कर्तुम् पदे कः प्रत्ययः ?

(अ) ल्यप् (ब) तुमुन् (स) क्त (द) क्त्वा

(घ) भावः इत्यस्य किं विलोमपदं अनुच्छेदे प्रयुक्तम् ?

(अ) विभावः (ब) प्रभावः (स) अभावः (द) स्वभावः

खण्डः 'ख ' रचनात्मकं कार्यम् **15 अंकाः**

2. मंजूषायां प्रदत्त–शब्दानां सहायतया चित्रं दृष्ट्वा पंच वाक्यानि संस्कृतेन लिखत्– **1X5=5**




**मंजूषा**

| |
|---|
| क्रीडन्ति, षष्टिः, पक्षिणः, दलम्, आनन्दवर्धकः, भाषाक्रीडा, पठति, वातावरणं, क्रियाकलापम्, सावधानाः |

2. संगणककक्षायां प्रवेशं प्राप्तुं प्रधानाचार्यं प्रति लिखिते प्रार्थनापत्रे रिक्तस्थानानि उचितपदैः पूरयत। पत्रं पुनः उत्तरपुस्तिकायाम् लिखत्। **1/2X10=5**

देववाणी भवनम्
तिथिः ...........................

(1) ................................ प्रधानाचार्यवर्याः
(2)........................................................,
सविनयं निवेदयामि यत् अहं (3).................... कक्षायां 90 प्रतिशतअंकान् गृहीत्वा उत्तीर्णः जातः। अधुना अहं (4)................ प्रवेष्टुम् इच्छामि। गणितविषये तु (5)................ सर्वदा शतप्रतिशतम् (6)....................गृह्यन्ते। अद्यत्वे सर्वेषु कार्येषु (7)................ अनिवार्यम्। कृपया महम् (8)...................... प्रदाय (9)................माम् अनुगृह्णन्तु ।
(10).............................................

प्रार्थी
अ. ब. स.

**मंजूषा –**

| |
|---|
| मान्याः, सधन्यवादः, आदरणीयाः, स्वीकृतिं, अंकाः, संगणककक्षायां, दशम, मया, संगणकम्, भवन्तः |

4. अधोलिखिते संवादे रिक्तस्थानानि **मंजूषायाम् प्रदत्तैःउचितपदैः पूरयत –** **1/2X10=5**

सर्वे – अहा ...हा ...उत्तमम्... अति उत्तमम्...

विद्योत्तमा – **(स्वगतं )** अत्र तु द्वौ एव विद्वांसौ (1).........। चिन्तानास्ति ... इदानीं ...किं.... करवाणि. तत् यथा–तथा पृच्छामि, किन्तु उत्तरं तु अहमपि न जानामि ...अस्तु ...तथापि**....** **(प्रकट)** वदतु मिथ्याकान्त महोदय! महाराजस्य दिलीपस्य पुत्रः (2)......... आसीत् ?

मिथ्याकान्तः – **(विस्मृत्य पुनःस्मृत्वा )** ....रघुः ।

विद्योत्तमा – घसीटानन्द पौराणिकवर्यः इदानीं भवान्..... रघोः पुत्रस्य किं (3) ........... आसीत् ?

घसीटानन्दः – **(स्वगतं )** एषा स्त्री तु कुशाग्रमत्याः (4) .................**(प्रकट)...** अजः।

विद्योत्तमा – **(प्रश्नं एकमेकं प्रति)...** अजस्य (5) ................ कः आसीत् ?

मिथ्याकान्तः – **(विस्मृत्य पुनःस्मृत्वा)** .... दशरथः।

विद्योत्तमा – दशरथस्य पुत्रः कः (6) ................ ?

विद्योत्तमा+मिथ्याकान्तः– वदतु.... वदतु....(7)......... वदतु....

घसीटानन्दः – **(विस्मृत्य)** ........ अहं तु **(नतसिरः)** न (8) .................।

विद्योत्तमा – भवान् वदतु दशरथस्य पुत्रः कः आसीत् ?

मिथ्याकान्तः – **(विस्मृत्य)** ...अ...अ्.... दशरथस्य पुत्रः आसीत् ....... ।

विद्योत्तमा – वदतु.... वदतु....शीघ्रं वदतु....

मिथ्याकान्तः – **(विस्मृत्य पुनःस्मृत्वा)** .... एकादशरथः।

विद्योत्तमा – **(छद्म प्रश्नं )** (9) ......................... पुत्रः कः आसीत् ?

मिथ्याकान्तः – **(छद्मोत्तरं )**एकादशरथस्य पुत्रः द्वादशरथः आसीत्? पृच्छतु....पृच्छतु....सर्वज्ञोऽहम् एतेषां पुत्रपौत्राः (10)......... पृच्छतु...अरे! त्रयोदशरथः चतुर्दशरथः पंचदशरथः..ह्ह्ह्

मंजूषा

| एकादशरथस्य, प्रतीयते, अपि, स्तः, पुत्रः, शीघ्रं, कः, नाम, आसीत्, जानामि |
|---|

**खण्डः 'ग ' अनुप्रयुक्तव्याकरणम्** **35 अंकाः**

5. अधोलिखितवाक्येषु रेखांकितपदेषु संधिं संधिविच्छेदं वा कुरुत – **1X3=3**

(i) <u>मात्रादेशः</u> पालनीयः।

(ii) <u>तव + औदार्यम्</u> इदम्।

(iii) यथा ज्ञानं <u>तथा + एव</u> आचरणम्।

5. (अ) उचित उत्तरस्य चयनं कृत्वा लिखत् – **1/2X6=3**

(क) मम ................ नाम सुरभिः अस्ति।

(i) धेनोः (ii) धेनो

(iii) धेनुः (iv) धेनवः

(ख) छात्राः .................... फलम् आनयन्ति।

(i) मित्रम् (ii) मित्राय

(iii) मित्रेण (iv) मित्रस्य

(ग) अत्र ................. आश्रमम् नास्ति।
(i) साणून् (ii) साधून्
(iii) साधूनाम् (iv) साधुः

(घ) कार्याणि ............. सिद्धयन्ति।
(i) उद्यमात् (ii) उद्यमः
(iii) उद्यमस्य (iv) उद्यमेन

(च) सर्वत्र ............. पूज्यते।
(i) विद्वात् (ii) विद्वानाः
(iii) विद्वान् (iv) विद्वानः

(छ) माता तस्य ............. ।
(i) मार्गदर्शिकः (ii) मार्गदर्शिका
(iii) मार्गदर्शिकान् (iv) मार्गदर्शा

(आ) उचित–उत्तरस्य चयनं कृत्वा लिखत 1X3=3
(क) ............ उत्तमा छात्रा अस्ति।
(i) तत् (ii) तत
(iii) सः (iv) सा

(ख) ............ शिवस्य मंदिरम् अस्ति
(i) एतत् (ii) सतत
(iii) इदम् (iv) सः

(ग) ............ छात्रस्य नाम अमृतः अस्ति।
(i) तस्यः (ii) तस्याः
(iii) एतस्य (iv) साः

7. (अ) अधोलिखितवाक्येषु कोष्ठके प्रदत्तसंख्यां संस्कृतेन लिखत 1X2=2
(क) कक्षायां ................ (95) छात्राः सन्ति।
(ख) उद्याने ................ (61) छात्राः सन्ति।

(आ) उचित–उत्तरस्य चयनं कृत्वा लिखत 1/2X2=1
(क) .................. छात्रः अति कुशलः अस्ति।(एका/एकः/एकम्)
(ख) शांतनोः .................. पुत्राः आसन्। (त्रयः/तिस्रः/त्रीन्)

8. (अ) मंजूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयत् 1X3=3
मंजूषा– विना, श्वः, एकदा

(i) .................. रविवासरः भविष्यति।

(ii) गुरुं .................... ज्ञानं न लभते।

(iii) .................... मम गृहे चौरः आगतवान्।

9. रेखांकितपदेषु उपसर्गं पृथक्कृत्वा संयोज्य वा लिखत 1X3=3

(i) पुत्रः पितरं <u>परिचरति</u>।

(ii) गंगा हिमालयात् <u>प्रभवन्ति</u>।

(iii) सः गृहं <u>प्रति+आगच्छत्</u>।

10. अधोलिखितरेखांकितपदेषु विभक्तिं तत्कारणं च लिखत 1X5=5

(i) शिक्षकः <u>छात्रे</u> स्निह्यति।

(ii) <u>बालेभ्यः</u> रसगोलकं रोचते।

(iii) सः <u>मह्यम्</u> धनम् अयच्छत्।

(iv) <u>ईश्वरात्</u> ऋते कोपि सहायकः नास्ति।

(v) <u>कक्षायाः</u> बहिः किं चलति?

11. समस्तपदानां नामानि लिखत 1X3=3

(i) प्रतिदिनम्

(ii) लाभालाभौ

(iii) यथारुचिः

12. कोष्ठकप्रदत्तेषु धातुरूपेषु उचितरूपपदं लिखत 1X5=5

(क) ते सत्यं .........................।(वदति, वदतः, वदन्ति)

(ख) बालिकाः प्रश्नं ..................... ।(अकरोत्, अकरोः, अकुर्वन्)

(ग) बालकः पितरौ ........................।(असेवत्, असेवथ, असेवन्त)

(घ) असत्यभाषणं ......................।(त्यजतु, त्यजतं, त्यजंत)

(ङ.) अहं प्रातः पितरं .......................।(नमति, नमसि, नमामि)

13. अधोलिखितवाक्येषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत 1X4=4

(i) मया पुस्तकं <u>पठितम्</u>।

(ii) सः गीतां <u>पठितवान्</u>।

(iii) त्वं <u>पठितुम्</u> कुत्र गच्छति?

(iv) अहं किमपि <u>दा+तुमुन्</u> न इच्छामि।

13. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत 5

(अ)

एकदा सः काशीनगरे गंगायाः तटे एकस्मिन् कुटीरे शिष्यै सह अतिष्ठत्। तत्र समीपम् एव एकः यात्री अपि अतिष्ठत्, ईर्ष्यया सः कुटीरम् आगत्य अकारणम् एव महर्षिं दुर्वचनानि वदति स्म। जितेन्द्रियः महर्षिः सर्वं श्रुत्वा शान्तमचित्तेन एव तिष्ठति स्म। सः कदापि न प्रत्युदतरत्। शिष्याः क्रुद्धाः अभवन् महर्षिः तान् 'चिन्तां मा कुरुत तूष्णीम् भवत' इति अकथयत।

(I) एकपदेन उत्तरत– 1/2x2=1

(क) कः दुर्वचनानि वदति स्म?

(ख) के क्रुद्धाः अभवन् ?

(II) पूर्णवाक्येन उत्तरत– 1x2=2

(क) महर्षिः शिष्यान् किम् अकथयत?

(ख) महर्षिः शिष्यै सह कुत्र अतिष्ठत्?

(III) निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत – 1/2x4=2

(क) 'जितेन्द्रियः महर्षिः सर्वं श्रुत्वा शान्तमचित्तेन एव तिष्ठति स्म' अस्मिन् वाक्ये 'महर्षिः' इति पदस्य विशेषणपदम् किम् ?

(अ) सर्वं (ब) श्रुत्वा (स) जितेन्द्रियः (द) तिष्ठति

(ख) 'अकथयत' इति क्रियापदस्य कर्तृपदं किम् ?

(अ) महर्षिः (ब) तान् (स) यात्री (द) शिष्यै

(ग) 'सः' इति सर्वनामपदं कस्मै। प्रयुक्तम् ?

(अ) शिष्याय (ब) महर्षये (स) नगराय (द) कुटीराय

(घ) 'दूरम्' इत्यस्य किं विलोमपदं अनुच्छेदे प्रयुक्तम् ?

(अ) क्रुद्धाः (ब) दुर्वचनानि (स) एकस्मिन् (द) समीपम्

(आ) अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत 5

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् तदेव वक्तव्यम् वचने का दरिद्रता।।

(I) एकपदेन उत्तरत– 1/2x2=1

(क) प्रियवाक्यप्रदानेन के तुष्यन्ति ?

(ख) तस्मात् तदेव किं कर्तव्यम् ?

(II) पूर्णवाक्येन उत्तरत– 1x2=2

(क) वचने का न कर्तव्यम्?

(ख) सर्वे केन तुष्यन्ति ?

(III) निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत – 1/2x4=2

(क) ' तस्मात् तद् एव वक्तव्यम्' अत्र अव्ययपदम् किम् ?
(अ) तस्मात् (ब) श्रुत्वा (स) जितेन्द्रियः (द) तिष्ठति
(ख) श्लोके 'वदनीयम्' इति पदस्य किम् पर्यायपदं प्रयुक्तम्?
(अ) वक्तव्यम् (ब) दरिद्रता (स) तुष्यन्ति (द) तस्मात्
(ग) 'अप्रिय' इति शब्दस्य किं विलोमपदं श्लोके प्रयुक्तम् ?
(अ) तुष्यन्ति (ब) प्रदानेन (स) वाक्य (द) प्रिय
(घ) 'निर्धनता' इत्यस्य कृते किं पदं श्लोके प्रयुक्तम् ?
(अ) दरिद्रता (ब) जन्तवः (स) वचने (द) समीपम्

(इ) अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत 5

आचार्यः – (सर्वान् दृष्ट्वा) किचिंत् विशिष्टं कथयितुम् अथवा ज्ञातुम् इच्छन्ति।

सर्वे – (मिलित्वा) आम् मान्यवर! वयम् अस्माकं पूर्वराष्टपतिमहोदयानां जीवनस्य विषये ज्ञातुम् इच्छामः। कृपया वदन्तु।

आचार्यः – अतीव शोभनम्। अवश्यमेव कथयिष्यामि। प्रारम्भे अहं कथयिष्यामि। मध्ये–मध्ये भवन्तः पृच्छन्तु। (श्यामपट्टं दृष्ट्वा सूक्तिं च पठित्वा) अतिशोभनम्। किम् एतदर्थम् एव इयं सूक्तिः अत्र लिखिता?

सर्वे – आम् मान्यवर।

आचार्यः – (प्रसन्नोऽस्मि) अधुना श्रृण्वन्तु–

प्रियच्छात्राः अस्माकं सम्मान्य–पूर्वराष्टपतिमहोदयस्य सम्पूर्णं नाम अस्ति–'डॉ. अबुल पाकिर जैनुलबद्दीन अब्दलु कलाम'इति! अस्य महोदयस्य जन्म एकत्रिंशत्–अधिक–एकोनविंशतिशततमे वर्षे (1931) अक्टूबर मासस्य पचंदशे दिवसे तमिलनाडु–राज्यस्य'रामेश्वरम्' क्षेत्रे एकस्मिन् सामान्ये परिवारे अभवत्। अस्य महोदयस्य पितुः नाम जैनुलबद्दीन मारकय्यर आसीत् मातुः च नाम आशियम्मा आसीत्।

(I) एकपदेन उत्तरत– 1/2x2=1
(क) कलाममहोदयस्य पितुः नाम किम् आसीत् ?
(ख) कलाममहोदयस्य माता का आसीत ?

(II) पूर्णवाक्येन उत्तरत– 1x2=2
(क) छात्राः किम् ज्ञातुम् इच्छन्ति ?
(ख) कलाममहोदयस्य पूर्णं नाम किम् आसीत् ?

(III) निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत – 1/2x4=2

(क) 'अस्य' इति पदं कस्मै प्रयुक्तम् ?
(अ) आचार्यय (ब) जैनुलबद्दीनाय (स) आशियम्मायै (द) कलाममहोदयाय
(ख) सम्मानीयः' इति पदस्यार्थे कः शब्दः प्रयुक्तः?
(अ) सम्मान्य (ब) सामान्य (स) प्रिय (द) प्रसन्नः

(ग) 'अन्ते' इति शब्दस्य किं विलोमपदं अत्र प्रयुक्तम् ?
(अ) प्रारम्भे (ब) प्रदाने (स) इति (द) अधुना

(घ) ' इयं सूक्तिः अत्र लिखिता ' वाक्ये अव्ययपदं किम् ?
(अ) इयं (ब) सूक्तिः (स) अत्र (द) लिखिता

15. मंजूषायां प्रदत्तैः शब्दैः भावार्थं पूरयत् 1X4=4

मंजूषा– | वर्षाणि, स्वीकृत्य, स्वस्थाः, कठिनम् |

(अ) अंगीकृतं सुकृतिनो न परित्यजन्ति।

भावार्थः – सज्जनाः कार्यं .................... संपूर्णं कुर्वन्ति। 'कार्यं .................. कठिनम् अस्ति' इति चिन्तयित्वा कदापि न त्यजन्ति।

(आ) अदीनाः स्याम शरदः शतम्।

भावार्थः – हे प्रभो! वयं सर्वैः अंगैः समर्थाः ................. च भूत्वा शतं ............ यावत् जीवेम्।

16. अधोलिखितं श्लोकं पठित्वा अन्वयं पूरयत 1/2X8=4

(अ) वृत्तं यत्नेन संरक्षेत् वित्तमायाति याति च।
अक्षीणः वित्ततः क्षीणः वृत्ततस्तु हतो हतः।।
अन्वयः – वृत्तं ....... संरक्षेत् वित्तम (तु) आयाति ........... च। वित्ततः क्षीणः तु .............. वृत्ततः तु .......... हतः भवति।

(आ) प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् तदेव वक्तव्यम् वचने का दरिद्रता।।
अन्वयः – सर्वे ............ प्रियवाक्य–प्रदानेन .............. तस्मात् तत् एव वक्तव्यम् ............... का ................ (भवेत्)

16. अधोलिखितवाक्यानि कथाक्रमानुसारं पुनः लिखत 1X5=5
(क) श्रृगालः मूषकराजं प्रहरति।
(ख) अविश्वस्ते न विश्वसेत्।
(ग) एकः श्रृगालः भोजनं प्राप्तुं भ्रमति स्म।
(घ) मूषकराजः हृष्टः पुष्टः आसीत्।
(ङ.) श्रृगालः हृष्टः पुष्टः अभवत्।

16. रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरूत् 1X5=5

(क) आचार्यः शिष्यम् उपदिशति ।

(ख) धर्मस्य कार्ये प्रमादः न करणीयः।

(ग) महर्षिः भारते अभ्रमत्।

(घ) गुरोः आज्ञा पालनीया एव।

(ङ.) उपास्यानि न इतराणि।

16. अधोलिखितपदानाम् उचितार्थपदैः सह मेलनं कुरूत् 1／2X4=2

| | | |
|---|---|---|
| (क) | सुकृतिनः | नित्यम् |
| (ख) | भ्रमति | सज्जनाः |
| (ग) | प्रतिदिनम् | विहरति |
| (घ) | उपगत्य | समीपं गत्वा |